# भाषापाठ्यपुस्तकानां गुणवत्ता

# Quality of Language Textbooks



Dr. R.Chandrasekhar
Associate Professor
Department Of Education
Rashtriya Sanskrit Vidyapeetha
Tirupati (A.P)

# भाषापाठ्यपुस्तकस्य महत्वम्



- पाठ्यपुस्तकं भाषाध्यापकस्य हस्ते विद्यमानं महत्वपूर्णमेकमुपकरणं वर्तते ।

- **The text-book is a very useful tool in the hands of a teacher of language. No doubt, a language can be learnt without any text book at all, but that may result in unnecessary repetitions, sometimes significant omissions, waste of energy and time, and a less planned progress.**

**-A.L.Kohli (*Techniques of Language Teaching –p.217*)**

# भाषापाठ्यपुस्तकस्य महत्वम्



- शिक्षणकलायां नैपुण्यसंपादनाय शिक्षकः, तार्किकविधिना शिक्षाग्रहणाय शिक्षार्थी च पाठ्यपुस्तकं समाश्रयतः ।

- ते श्रुतान् पाठितान् च विषयान् आत्मसात् कर्तुं मुहुर्मुहुः पिपठिषन्ति । एतदर्थं पाठ्यपुस्तकं नितरामपेक्ष्यते एव ।

# भाषापाठ्यपुस्तकस्य महत्वम्



- राष्ट्रियैकतायाः, देशभक्तिभावनायाश्च जागरणे भाषापाठ्यपुस्तकानि उपकुर्वन्ति न तु विषयगतपाठ्यपुस्तकानि ।

- गृहकार्यकरणाय, पाठितांशानां कण्ठस्थीकरणाय च पाठ्यपुस्तकानि अपेक्ष्यन्ते ।

# भाषापाठ्यपुस्तकम्

छात्राणां व्यवहारे भाषाज्ञानस्य, शब्दभाण्डारस्य, श्रवण-भाषण-पठन-लेखन चतुर्विधकौशलानां विकासार्थं, शब्दार्थस्य बोधनार्थं, व्याख्यानार्थं, समुचितसम्प्रेषण-संरचनात्मककौशलानाञ्च विकासार्थं पाठ्यपुस्तकं निर्मीयते ।



# सूक्ष्माध्ययनस्य पुस्तकानि




- सूक्ष्माध्ययनपाठ्यपुस्तकानामुद्देश्यं छात्राणां शब्दभाण्डारस्य वर्धनं, भाषाज्ञानस्य वर्धनं, सूक्तीनां लोकोक्तीनाञ्च परिचयः, विविधप्रसङ्गानां स्पष्टज्ञानञ्च भवति ।

- एतेषामध्ययनेन छात्राणां ज्ञानं वर्धते। विविधकवीनां लेखकानाञ्च विचाराः ज्ञायन्ते ।

- एतादृशपाठ्यपुस्तकेषु समाविष्टानां विषयाणां शब्दार्थस्य बोधनं व्याख्यानञ्च प्रदीयते ।

# विस्तृताध्ययनपुस्तकानि

- विस्तृताध्ययनपुस्तकानामुद्देश्यं छात्राणां शीघ्रवाचनस्य अभ्यासो भवति । अत्र सरलभाषायाः प्रयोगो क्रियते ।



- छात्राः शीघ्रगत्या पुस्तकं पठित्वा अर्थ जानीयुः ।

- अत्र समाविष्टस्य विषयस्य शब्दार्थस्य बोधनं , व्याख्यानञ्च नैव प्रदीयते ।

# उपयोगः



- पाठ्यपुस्तकं शिक्षकस्य कृते मार्गदर्शन
  ।

- पुस्तकं नैकविधसूचनानां भण्डारः वर्तते ।

- पाठ्यपुस्तकस्य माध्यमेन छात्राः गृहे उपविश्यैव अध्येतुम्, गृहकार्यं सम्पादयितुं च शक्नुवन्ति ।

# भाषापाठ्यपुस्तकस्य वैशिष्ट्यानि




- भाषा मानवजीवनस्य सर्वक्षेत्रसम्बध्दा, सर्वपक्षसम्बध्दा च वर्ततेत्यतः तत्पुस्तके साहित्यसंस्कृतिधर्मेतिहासविज्ञानभूगोलवाणिज्योद्योग क्रीडामनोरञ्जनादि सर्वविध विषयसामग्र्यः परिदृश्यन्ते ।

- भाषापाठ्यपुस्तकस्य सामग्र्यः विभिन्नक्षेत्रेभ्यः स्वीकृताः इतरपाठ्यपुस्तकानां विषयसामग्र्यः निर्दिष्टक्षेत्रात् स्वीकृताः सीमिताश्च भवन्तीति फलितम् ।

- भाषा न केवलं विषयमात्रं वर्तते । सा तु सर्वविषयाणाम् अधिगममाध्यमं वर्तते ।

# भाषापाठ्यपुस्तकस्य वैशिष्ट्यानि




- भाषाज्ञानं, विषयज्ञानमिति प्रयोजनद्वयं सकृत् समुपलभ्यते भाषापाठ्यपुस्तकाध्ययनेन ।

- पाठ्यपुस्तके एतान् विभिन्नक्षेत्रसम्बध्दान् विचारान् तथा प्रस्तुतीकुर्वन्ति यथा छात्राणां ज्ञानवृध्दया सह तेषां भाषापाण्डित्यमपि वर्धेत ।

# भाषापाठ्यपुस्तकस्य वैशिष्ट्यानि




- षष्ठकक्ष्यादारभ्य नवमकक्ष्यापर्यन्तं विद्यमानेषु भाषापाठ्यपुस्तकेषु भाषिक - वैचारिकेत्युभयपक्षयोः समप्रधान्यं स्यात् ।

- प्राथमिकस्तरस्य पाठ्यपुस्तके तथा संवादप्रकृतिवर्णनक्रियाप्रधानगीतानि च स्युः ।

- माध्यमिककक्ष्यायाः पाठ्यपुस्तके तु प्रौढकथा, निबन्ध, जीवनवृत्तान्त, आदर्शपुरुषचित्रण, यात्रा एकाङ्कपाठ कवितादयश्च स्युः ।

# सिध्दान्ताः




- शैक्षिकक्षेत्रं प्रति सर्वप्रकारकच्छात्राः शिक्षामधिगन्तुमायान्ति । तेषां स्तर-आवश्यकताः आकाङ्क्षा-रुच्यादयः समानाः कदापि न भवन्ति ।

- सर्वेषां छात्राणां स्तरानुगुणं, मनोवैज्ञानिकसिध्दान्तानुसारञ्च पाठ्यपुस्तकानां निर्माणमवश्यं करणीयं भवति ।

# आन्तरिकपक्षस्य सिध्दान्ताः

- 1.**विषयवस्तु** – पुस्तकस्थं विषयवस्तु पूर्णं स्यात् । छात्राणां सर्वविधावश्यकतानां पूरणे तत्क्षमं स्यात् ।
- पुस्तकपठनानन्तरं छात्राः सन्तुष्टाः भवेयुः




- पुस्तकान्तरस्यान्वेषणे आवश्यकता नैवभवेत् ।

# विषय वस्तु



I. **मनोवैज्ञानिकता** –

- छात्राणां मनःस्थितिरुचिप्रवृत्तिक्षमताविभिन्नतादिकं परिशील्य पाठ्यपुस्तकं संरचनीयम् ।
- प्राथमिककक्ष्यायाः छात्राणां कृते रोचकवर्णनात्मकप्रणाली अवलम्बनीया ।
- माध्यमिक उच्चस्तरीयाणां छात्राणां कृते गहननिबन्धात्मकशैलीन् अवलम्ब्य पुस्तकं संरचनीयम् ।

# विषयवस्तु



## ii. सोद्देश्यता –

- प्रत्येकं पाठ्यपुस्तकं स्तरानुगुणं कैश्चित् निश्चितैः उद्देश्यैः निर्मीयते । तेषामुद्देश्यानां सम्पादनं तत्र स्यात् ।

## iii. उपयुक्तता –

- पाठ्यपुस्तके विविधप्रकरणेषु प्रतिपादिताः विषयाः मानसिक – बौध्दिकस्तरानुगुणं भवेयुः ।
- छात्राणामध्यापकानाञ्च उपयोगानुसारं विषयाणां निरुपणप्रकारः, भाषा, शैली , च स्युः ।

# स्तु



## iv विषयवैविध्यम्

- पाठ्यपुस्तके विषयाणां वैविध्यमवश्यकं सम्पादनीय पद्य, गद्यं, रुपकम्, अलङ्कारा:, छन्द: , सम्भाषणं, व्याकरणमित्यादि विषयवौविध्यप्रकारा: भवेयु: ।
- महानुभावानां जीवनचरितं, स्वतन्त्रसङ्ग्रामगाथा:, साहसिककथा:, यात्रावर्णनं, हितोपदेशकथा:, इत्यादि विषयवैविध्येन छात्राणामध्ययनासक्ति: विकसति ।

## v. रोचकता

- छात्राणां रुचेरनुगुणं पाठ्यसामग्री भवेत् ।
- प्राथमिकस्तरे हास्यकथा:, क्रीडा:, गीतानि, प्राकृतिकदृश्यानि च छात्राणामाह्लादकरानि, मनोरञ्जकाणि च भवन्ति ।

# विषयवस्तु



## vi. जीवनेन सह सम्बध्दता

- बालजीवनसम्बध्दविषयाः पाठ्यपुस्तके स्युः ।
- विषयवस्तु छात्राणां भाविजीवने उपयुक्तकरं सिध्येत् ।

## Vii आदर्शवादः

- सुभाषितानि, महात्मनां चरित्राणि, धार्मिकविषयाः ऐतिहासिकगाथाः च छात्राणाम् आदर्शविचाराणां नैतिकव्यवहारस्य च विकासाय महत्वपूर्णतयोपकुर्वन्ति ।

# विषयवस्तु




Viii **मूल्यानां विकासः**

- पाठ्यपुस्कानां माध्यमेन कतिपयगुणमूल्यानाञ्च विकाससम्पादनमपि पाठ्यपुस्तकनिर्माणस्य प्रधानोद्देश्यं वर्तते ।
- छात्राः सच्चरित्राः देशस्य च स्वस्थनागरिकाः भूयासुरिति धियैव तेभ्यो विद्यालये शिक्षा प्रदीयते ।

# विषयवस्तु



## व्यक्तिगतगुणमूल्यानि

- प्रामाणिकता - कर्तव्यपरायणता - वैज्ञानिकदृष्टिः - शारीरिकश्रमं प्रति निष्ठा – आत्मनिर्भरता - आशावादिता - उत्तरदायित्वभावना - साहसिकता - ध्येयनिष्ठता – वैचारिकदृष्टिः - चिन्तनक्षमता - अनुशासनम् - शिष्टाचारः - धैर्यम् - क्षमा - वीरता - त्यागबुध्दिः - परोपकारः - अहिंसा - सहिष्णुता - सरलजीवनम् इत्यादि ।

# विषयवस्तु




## सामाजिकगुणमूल्यानि

- सहयोगः - उदारता - प्राणिदया - परधर्मसहिष्णुता –परजातिसहिष्णुता - भाषासहिष्णुता - प्राचीनकलासंस्कृतिविषये गौरवादरभावना - समानता - एकता - मानवीयता इत्येतेषां सामाजिकगुणमूल्याणां संवर्धनयोग्याः सामग्र्यः पाठ्यपुस्तके वर्तेरन् ।

# विषयवस्तु




## राष्ट्रियान्ताराष्ट्रियगुणमूल्यानि

- गणतन्त्रे आस्था - देशप्रेमः – धर्मनिरपेक्षता – राष्ट्रियसंपदः सुरक्षा- प्रादेशिकसङ्कीर्णतायाःपरित्यागः - अनेकतायामेकता - राष्ट्रियैकता - वसुधैवकुटुम्बकम् इति भावनाविकासः ।

# विषयवस्तु



## ix. आधुनिकविषयानां समावेशः

- पुराण-आधुनिकविषययोः समप्राधान्यं प्रदातव्यम् ।

- वैज्ञानिकाविष्काराः, प्रजातन्त्रं, वर्तमाननेतृणां जीवनचरित्राणि, प्राविधिकविषयादयः पाठ्यपुस्तके समाविष्टाःस्युः ।

# विषयवस्तु




## x. व्यवस्थितक्रमः

- पद्य – गद्यादि विषयाः सर्वे कदापि विशिष्टतया एकस्मिन्नेव क्रमे नैव व्यवस्थापनीयम् । इदं छात्रेषु नीरसतां जनयति ।
- अत एव विषयवैविध्यानुसारं पाठानां व्यवस्थितक्रमः सम्पादनीयः।

# विषयवस्तु




## अभ्याससम्बध्दाः अवधातव्याः अंशाः

1. पाठ्यपुस्तके विद्यमानाः अभ्यासाः सर्वेषामपि छात्राणां बुध्दिगम्याः, आसक्त्युत्पादकाश्च स्युः ।
2. केचन तादृशा अपि अभ्यासाः पाठान्ते विद्येरन् येषां समाधानं छात्राः विचिन्त्यैव दातुं शक्नुयुः ।
3. छात्राणाम् इतरविषयगतानुभवस्य, इतरविषयकचिन्तनस्य च अनुप्रयोगाय योग्या अभ्यासाः पाठ्यपुस्तके स्युः ।

# आन्तरिकपक्षस्य सिध्दान्ताः - भाषा




## पाठ्यपुस्तकेषु उपयुक्ता भाषा ईदृशी स्यात् -

**स्तरानुकूलता**

- न केवलं पुस्तकस्थं विषयवस्तु अपि तु भाषाऽपि छात्राणां कक्षारुचिवयस्तरानुरूपा च स्यात् ।

**भाषाधिकारवर्धता**

- पाठ्यपुस्तके नूतनशब्दानां परिचयः, वाक्ययोजना, सूक्त्यादीनां सङ्ग्रहश्च छात्राणां भाषाधिकारं वर्धयन्ति ।
- नवीनशब्दानामेव पुनरावृत्तिः स्यात् न तु साधारणशब्दानां मातृभाषाशब्दानां संस्कृते तत्समशब्दाः बहुलं प्रयोक्तव्याः ।

# आन्तरिकपक्षस्य सिध्दान्ताः - भाषा




## सरलता एवं स्पष्टता

- भाषायाः सरलता स्पष्टता च पाठ्यांशावगमनाय छात्राणां कृते उपकरोति ।

## क्रमबध्दता

- पाठ्यपुस्तकं क्रमबध्दम् वर्तेत ।
- पाठ्यांशाः परस्परं सम्बध्दाः स्युः ।
- पाठ्यांशाः विच्छिन्नाः नैव भवेयुः ।

# आन्तरिकपक्षस्य सिध्दान्ताः - भाषा



## शब्दावली –

- पाठ्यपुस्तकस्थशब्दावल्यां ७५% शब्दाः ते एव स्युः ये च पूर्वतनकक्ष्यायाः पाठ्यपुस्तके वर्तन्ते ।
- २५% नूतनशब्दाः पाठ्यपुस्तके वर्तेतन् ।
- नूतनशब्दानां प्रयोगः बहुत्र महुर्मुहुः कर्तव्यः ।
- नूतनशब्दानां पाठ्यपुस्तके संयोजनक्रमः शिक्षाविद्भिः इत्थं निरूपितः वर्तते –
- प्रथमकक्ष्यायाः छात्राणां कृते - २°° नूतनशब्दाः, द्वितीयकक्ष्यायाः - ३°°,

तृतीयकक्ष्यायाः-४°°, पञ्चमीकक्ष्यायाः-६°°, अष्टमीकक्ष्यायाः-९°° नवमदशमकक्ष्ययोः १°°° तः १,२°°

# आन्तरिकपक्षस्य सिध्दान्ताः - शैली



पाठ्यपुस्तके उपयुज्यमाना भाषाशैली ईदृशी स्यात्

**प्रभावोत्पादकता** – पाठ्यपुस्तकार्थं तादृशानि अध्यायानि चेतव्यानि येषां शैली आकर्षका, प्रभावोत्पादका च वर्तेत ।

- प्रभावोत्पादकशैल्याम् ओजप्रसादामाधुर्यादयः गुणाः वर्तन्ते ।

**स्तरानुकूलता** – पुस्तकस्य शैली निर्दिष्टकक्ष्यायाः छात्राणां स्तरानुकूला स्यात् ।

- निम्नकक्ष्यायाः शैली विवरणात्मिका, संवादरूपा, कथामुखी च स्यात् ।
- उच्चकक्ष्यायाः शैली भावपूर्णा तर्कप्रधाना च स्यात् ।

# बाह्यपक्षस्य सिध्दान्ताः




## आकारः (Shape)

- पाठ्यपुस्तकस्याकारः छात्राणां स्तरवयोनुरूपः शिक्षाविद्भिः इत्थं निर्धारितः वर्तते ।

| स्तरः | पुस्तकस्याकारः |
|---|---|
| प्राथमिकस्तरः | 9½×7 |
| माध्यमिकस्तरः | 8×6 |
| उच्चमाध्यमिकस्तरः | 8×5 |

# बाह्यपक्षस्य सिध्दान्ताः



## कागदम् (paper)

- पाठ्यपुस्तकमुद्रणायोपयुक्तं कर्गजं माध्यमिकशिक्षासमित्या प्रदत्तं HPC 58 GSM water mark crème wove भवेत् ।

# बाह्यपक्षस्य सिध्दान्ताः



## कागदम् –(paper)

- पाठ्यपुस्तकस्य मुद्रणाय चितानि कागदानि उत्कृष्टानि स्युः । शुष्के. घने, श्वेते च कागदे अक्षराणि सुष्ठु दृश्यन्ते ।

## मुद्रणम्  (printing)

### छात्राणां स्तरः

- यदि छात्राः कनिष्ठस्तरीयाः तर्हि विषयाः बृहदक्षरैः टङ्कनीयाः ।

# मुद्रणम् (printing)



पृष्ठविन्यासः (Page design) पृष्ठविन्यासावसरे अवधातव्याः अंशाः

- पाठ्यपुस्तकस्य मुद्रितपृष्ठेषु एकरूपता स्यात् ।
- शब्दानां मध्ये विद्यमानःअवकाशः समानः स्यात् ।
- सर्वोऽपि नूतनाध्यायः नूतनपुटे एव मुद्रणीयः ।
- पाठस्य शीर्षकं भिन्नशैल्या मुद्रितं स्यात् ।

# बाह्यपक्षस्य सिध्दान्ताः




## अक्षरपरिमाणम् (Letter size)

- पाठ्यपुस्तकस्य अक्षरपरिमाणं छात्रस्तरानुगुणं स्यात् ।
- प्रारम्भिककक्ष्यासु बृहदक्षराणि, उच्चकक्ष्यासु अल्पाक्षराणि च स्युः ।
- यथा प्राथमिककक्ष्यायां ४८ बिन्दुपरिमाणानि (font size) अक्षराणि
- द्वितीयकक्ष्यायां ३६ बिन्दुपरिमाणानि,
- तृतीयकक्ष्यायां ३° बिन्दुपरिमाणानि अक्षराणि स्युः ।
- उच्चमाध्यमिकस्तरस्य पाठ्यपुस्तकेषु १८ बिन्दुपरिमाणानि अक्षराणि स्युः ।

# बाह्यपक्षस्य सिध्दान्ताः



## चित्राणि (Pictures)

- प्रस्तुतीकृतविषयेषु सम्बन्धमवगन्तुं पाठ्यांशान्  सरलरीत्या अध्यापनाय, छात्रावबोधाय, छात्रावधानसम्पादनाय, छात्रदृष्ट्याकर्षणाय च चित्राणि महदुपकुर्वन्ति।

- प्रारम्भिककक्ष्यासु पाठ्यपुस्तकेषु आकर्षकानि, वर्णरञ्जितानि, प्रकृत्यनुगुणानि अधिकानि च चित्राणि स्युः ।

- नियमितरूपेण वर्णमयानि स्युः श्वेतकृष्णमय (Black & White) चित्राणि नैव भवेयुः ।

# बाह्यपक्षस्य सिध्दान्ता:




## मुखपृष्टम्  (Cover page)

- मुखचित्रं विविधवर्णैः चित्रैः मनोरञ्जकम् आकर्षणीयञ्च स्यात् ।

## बन्धनम् ( Binding)

- सरलतया पाठ्यपुस्तकमपावृताय योग्यबन्धनं कुर्यात्

## नाम (Title)

- पाठ्यपुस्तकस्य नाम सरलं संक्षिप्तं, स्पष्टम्, आकर्षकञ्च भवेत् ।
- पुस्तकान्तर्गतविषयस्य निर्देशं स्यान्नाम ।

# बाह्यपक्षस्य सिध्दान्ताः



## सम्पादनम् (Editing)

- एतेषां सम्पादनं मनोविज्ञानुसारं सश्रध्दं कर्तव्यम् ।
- कक्ष्याणां स्तरानुगुणं पाठानामाकारः, शैली च स्याताम् ।
- अवाञ्छनीयाः, प्रसङ्गविरुध्दाश्च विषयाः परिहरणीयाः ।
- विषयाणां क्रमभङ्गो न स्यात् ।

# पाठ्यपुस्तकस्य लेखकः



- निर्दिष्टस्तरीयच्छात्राणां पठनलेखनचिन्तनशक्तेश्च तेषां रुचिप्रवृत्योश्च परिज्ञानेन विना पाठ्यपुस्तकस्य लेखनं नैव कर्तव्यम् ।

- विभिन्नक्षेत्रेषु विषयेषु च कृतपरिश्रमस्यैकस्य लेखकस्य सम्प्राप्तिः प्रायः दुष्करा एव

- अत एव पाठ्यपुस्तकं लेखकगणेन लिख्यते ।

## पाठ्यपुस्तकलेखनसन्दर्भे एकः लेखकगणः समीक्षकगणश्च आदौ सङ्घटनीयः ।



### पाठ्यपुस्तकलेखकमण्डली निर्देशनपरामर्शसमितिः

1) सम्पादकः 1) पाठ्यपुस्तकसम्बध्दविषये
कृतभूमिपरिश्रमः

2) विषयविशेषज्ञः (विश्वविद्यालयस्य
उपन्यासकः प्रवाचको वा )

3) बालसाहित्यलेखने सिध्दहस्तः कथानाटककारः 2)
प्रशिक्षणमहाविद्यालयस्यैकः

4) लेखनकुशलः योग्यः विषयाध्यापकः
विषयविशेषज्ञोपन्यासकः ।

5) पाश्चात्यभाषा साहित्यवेत्ता च 3) शिक्षाशास्त्री तथा
मनोविज्ञानी ।

# भाषापाठ्यपुस्तकनिर्माणं शैक्षिकोद्देश्यानि



**शैक्षिकोद्देश्यानि छात्राधिगमे विषयवस्तुनः चयने, तथा अधिगमविधीनां चयने च सहकुर्वन्ति । [illegible] शैक्षिकोद्देश्यानि शिक्षणोद्देश्येभ्यः**

| शैक्षिकोद्देश्यानि (Educational Objectives) | शिक्षणोद्देश्यानि (Teaching Objectives) |
|---|---|
| 1.अस्य सम्बन्धः सम्पूर्णशिक्षाक्षेत्रेण सह वर्तते । | अस्य सम्बन्धः कक्ष्यामात्रासीमितास्ति । |
| 2.अस्याधारःसामाजिकः तथा दार्शनिकाश्च वर्तते । | मनोवैज्ञानिकाधारोऽस्य वर्तते । |
| 3.शैक्षिकोद्देश्यम् अतीवव्यापकं वर्तते । | एतदतीव सङ्कुचितं भवति एतत्तु शैक्षिकोद्देश्यानां प्राप्तेः साधनं वर्तते । |
| 4.एतत् सामान्यं भवति । | एतत् विशिष्टं व्यापकञ्च भवति । |

# भाषापाठ्यपुस्तकनिर्माणे शैक्षिकोद्देश्यानि




- पाठ्यक्रमे योजनीयाः विचाराः कुत्र कथं योजनीयाः इति आदावेव ज्ञातुं शक्नुमः ।
- शैक्षिकव्यवस्थायाः क्रियाकलापानाञ्च क्षेत्रस्य सीमायाश्च अवगमनाय एतदुपकरोति ।
- एतत् शिक्षणाधिगमव्यवस्थायाः नियोजने अध्यापकानां कृते मार्गदर्शनं प्रददाति ।
- पाठ्यपुस्तकमूल्याङ्कननिर्माणोपकरणनिर्माणे उपकरोति

# शैक्षिकोद्देश्यानां वर्गीकरणम् (ब्लूम् मतानुसारम् )

| ज्ञानात्मकोद्देश्यानि (Cognitive Objectives) | भावात्मकोद्देश्यानि (Affective Objectives) | मनोगत्यात्मकोद्देश्यानि (psychomotor Objectives) |
|---|---|---|
| ज्ञानम् (Knowledge) | ग्रहणम् (Receiving) | क्रियात्मकसञ्चालनानि (Reflex movements) |
| बोधः (Comprehension) | प्रतिस्पन्दनम् (Responding) | आधारभूताङ्गसञ्चालनानि (Basic Fundamental movements) |
| प्रयोगः (Application) | मूल्याङ्कनम् (Valuing) | प्रत्यक्षीकरणात्मकक्षमताः (Perceptual abilities) |
| विश्लेषणम् Analysis संश्लेषणम् (Synthesis) | सङ्घटनम् (Organizing) वैशिष्ट्यचित्रणम् (Characterizing) | शारीरिकक्षमताः (Physical abilities) कौशलात्मक सञ्चालनानि (Skilled |

# भाषापाठ्यपुस्तकस्य सीमाः




- पाठ्यपुस्तकम् आध्यापकस्य सर्वकार्यसम्पादकमिति नैव चिन्तनीयम् ।
- भाषाबोधनाय विद्यमानेषु उपायेषु अयमप्येकमिति मन्तव्यम् ।
- अध्यापकस्तु छात्राणां बोधने स्वतन्त्रः वर्तते ।
- भाषायां सामान्यज्ञानप्राप्तेः परमेव पुस्तकमेकम् उत्तमोपकरणम् इति भाति ।
- मौखिकशिक्षणेन विना भाषाध्ययनायपुस्तकस्यैव प्रयोगः निरर्थक एव वर्तते ।
- अध्यापकः पाठ्यपुस्तकस्य प्रयोगात् पूर्वं तस्य मूल्याङ्कनं कुर्यादेव ।

# पाठ्यपुस्तकस्य न्यूनताः

- पाठ्यपुस्तकं छात्रेभ्यः सैध्दान्तिकविषयसम्बध्दज्ञानम आधिक्येन प्रददाति न तु व्यावहारिकजीवनसम्बध्दज्ञ



- पाठ्यपुस्तकनिर्माणावसरे छात्राणां वैयक्तिकरुचिप्रवृत्तिमनोवृत्त्यादीनां विषये, वातावरणस्य च विषये ध्यानं नैव दीयते ।

- बहुत्र पाठ्यपुस्तके उपयुज्यमाना भाषा स्तरानुगुणा नैव भवति । अनेन छात्राः विषयान् आत्मसात् कर्तुं क्लेशमनुभवन्ति ।

- शिक्षकाः पुस्तकीयज्ञानप्रदानमेव अस्माकं कर्तव्यमिति चिन्तयेयुः । अनेन छात्राः शिक्षकाणां नैजानुभवैः वञ्चिताः

# पाठ्यपुस्तकस्य न्यूनताः



- पाठ्यपुस्तकं छात्रान् कण्ठस्थीकरणाय प्रचोदयति । अनेन तेषां तार्किकचिन्तनशक्तिः कुण्ठिता भवति ।
- पाठ्यपुस्तकं छात्राणां विचारतर्कनिर्णयकल्पनादीनां शक्तीनां प्रयोगाय अवसरं नैव प्रददाति । किञ्च छात्राः अन्धानुकरणशीलाः भवन्ति ।
- पाठ्यपुस्तकं छात्राणाम् अन्वेषणशक्तिं, पुरोगामिताञ्च ( Initiative) निरुणाद्धि ।
- विषयवस्तुनः सङ्घटनं प्रस्तुतीकरणञ्च मनोवैज्ञानिकसिध्दान्तानुगुणं नैव क्रियतेत्यतः छात्राः

# ह्रासे हेतवः

- पाठ्यपुस्तकलेखका अपि विना परिश्रमं पञ्चषट्ग्रन्थान् परिशील्य तत्रत्यान् विषयान् सङ्गृह्य एकं नूतनपुस्तकं रचयन्ति प्रस्तुतीकरणमपि अनाकर्षकं परिदृश्यते ।

- पुस्तकप्रकाशनक्षेत्रेऽपि अद्य स्पर्धा वर्तते । नूतनाः प्रकाशकाः  अत्यल्पकाले अत्यधिकानि पुस्तकानि प्रकाशयित्वा प्रयच्छन्ति । एवं करणेन प्रकाशनसम्बध्दाः बहुविधदोषाः पुस्तकेषु परिदृश्यन्ते । एते लेखकानां लेखानाञ्च विषये ध्यानं नैव यच्छन्ति ।

- प्रकाशकाः धनप्राप्त्याशया  पुस्तकस्य मूल्यं वर्धयन्ति उत अयोग्यकागदानि उपयुज्य पुस्तकं मुद्रयन्ति । किञ्च पाठ्यपुस्तकलेखकेभ्यः अपि अत्यल्पवेतनं लभ्यते इत्यतः

# संवर्धनोपायाः

- पाठ्यपुस्तकस्य गुणवत्तासंवर्धनाय पार्थक्येन एकस्याः उच्चाधिकारयुक्तायाः
  पाठ्यपुस्तकसमितेः निर्माणं कर्तव्यम् ।
- पाठ्यपुस्तकसमितेः निर्मानानन्तरं तेभ्यः कार्यशाला आयोज्य पुस्तकनिर्माणविषये प्रशिक्षणम् अवश्यं देयम् ।
- पुस्तके उपयुज्यमानकागदस्य विषये, तदाकारविषये, मूल्यस्य च विषये सर्वकारस्य नियन्त्रणं स्यात् । पाठ्यपुस्तकस्य स्तरमपि ते एव पूर्वं निर्धारयेयुः ।
- Text book Format अपि पूर्वनिर्धारितं स्यात् ।
- पुस्तकलेखनाधिकारः लेखकैः, प्रकाशनाधिकारः प्रकाशकैश्च सर्वकारद्वारा प्राप्तव्यः ।
- पुस्तकमूल्यनिर्धारणं सर्वकाराधीनं स्यात् ।
- पुस्तकचित्रकलायाः विकासाय, पोषणाय, प्रशिक्षणप्रदानाय च सर्वकारेण प्रयत्नः कर्तव्यः।
- पाठ्यपुस्तकं धर्मनिरपेक्षतासिध्दान्ताधारेण लिखितं स्यात् ।


सर्वे भवन्तु सुखिनः
सर्वे सन्तु निरामयाः
सर्वे भद्राणि पश्यन्तु
मा कश्चिद् दुःखभाग्भवेत्
May all be happy,
May all be without disease,
May all creatures have well-being
And none be in misery of any kind.

# धन्यवादाः